चतुर्दशः पाठ

CA67BA

# सुभाषितानि

अलसस्य कुतो विद्या, अविद्यस्य कुतो धनम्।

अधनस्य कुतो मित्रम्, अमित्रस्य कुतः सुखम्।। 1।।

न चैरहार्यं न च राजहार्यं न भ्रातृभाज्यं न च भारकारि।

व्यये कृते वर्धत एव नित्यं विद्याधनं सर्वधनप्रधानम्।। 2।।

शैले शैले न माणिक्यम्, मौक्तिकं न गजे गजे।

साधवः नहि सर्वत्र, चन्दनं न वने वने।। 3।।

उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः।

न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः।। 4।।

नमन्ति फलिनो वृक्षाः नमन्ति गुणिनो जनाः।

शुष्कवृक्षाश्च मूर्खाश्च न नमन्ति कदाचन।। 5।।

## शब्दार्थाः

**न चैरहार्यम्**-चोर के द्वारा चुराने योग्य नहीं है, **भारकारि**-भारयुक्त, **कुतः**-कहाँ, **माणिक्यम्**-मणि, **मौक्तिकम्**-मोती, **साधवः**-अच्छे लोग, **उद्यमेन** - परिश्रम के द्वारा, **न मनोरथैः**- मन की इच्छा मात्र से नहीं, **सुप्तस्य सिंहस्यः**-सोते हुए सिंह के, **प्रविशन्ति**-प्रवेश करते हैं **नमन्ति**-नमन करते हैं, **शुष्कवृक्षाश्च**-और सूखे वृक्ष, **कदाचन**-कभी।

*शिक्षण-संकेतः*

*शिक्षकः यति-गति-लयपूर्वकं श्लोकानाम् उच्चारणं कारयेत्*

अभ्यासाः

**1. एकपदेन उत्तरत-**

(क) अलसस्य किं नास्ति ?

(ख) शैले शैले किं न भवति ?

(ग) कस्य मुखे मृगाः न प्रविशन्ति ?

(घ) कीदृशाः वृक्षाः नमन्ति ?

**2. वाक्यानि पूरयत-**

(क) अविद्यस्य कुतो ..................................... ।

(ख) नमन्ति .......................................... वृक्षाः।

(ग) साधवः नहि .......................................... ।

(घ) विद्याधनं सर्वधनं ..................................... ।

**3. श्लोकांशान् योजयत -**

(क) अधनस्य कुतो मित्रम् - प्रविशन्ति मुखे मृगाः।

(ख) शैले शैले न माणिक्यम् - नमन्ति गुणिनो जनाः।

(ग) न हि सुप्तस्य सिंहस्य - मौक्तिकं न गजे गजे।

(घ) नमन्ति फलिनो वृक्षाः - अमित्रस्य कुतो सुखम्।

*शिक्षण-संकेतः*

*शिक्षकः यति-गति-लयपूर्वकं श्लोकानाम् उच्चारणं कारयेत् ।*

2. ''ज्ञः'' इति योजयित्वा पदानि रचयत